व्याख्या–मरूस्थल में गायें प्रसन्न (सन्तुष्ट) है, मनुष्य प्रसन्न है और व्रत, दान एवं यज्ञों से देवता भी प्रसन्न है। एंसा क्या है, जिससे मरूप्रदेश सम्पन्न नहीं है? अर्थात् सभी से सम्पन्न है। अतः इस मरूप्रदेश को आपके द्वारा विद्या से सम्पन्न करना चाहिए।

**प्रश्न–(15) अधोलिखित गद्यांशं पठित्वा एतदाधारित प्रश्नानाम् उत्तराणि यथानिर्देशं लिखत–**
**(1)** वैदिकसाहित्यं प्रमुखतया द्विविधं अस्ति–मन्त्ररूपः ब्राह्मणरूपश्च।मन्त्र समुदायः एव संहिता शब्देन व्यवह्रियते ब्राह्मणरूपः वेदभागः संहिता भागस्य व्याख्यारूपः विद्यते। ब्राह्मणभागः

CBEO BHINDER

यागस्वरूपबोधकः अस्ति। एषः त्रिधा विभक्तः भवति–ब्रह्मण आरण्यकम उपनिषद् च।
यज्ञस्वरूप–प्रतिपादकः ब्राहनणभागः। अरण्यो पठिताः यज्ञस्य आध्यात्मिकरूप विवेचयन्तः वेदभागः आरण्यकानि। उपनिषदः ब्राम्हात्मबोधिकाः मोक्षसाधिकाः सन्ति।
वेदस्य अन्तिमरूपतया उपनिषद 'वेदान्तः' इत्युच्यते। ब्राहम्णभागः गृहस्थानां कृते उपयोगी, आरण्यकभागः वानप्रस्थानां कृते, उपनिषद् भागश्च संन्यस्तानां हेतो बहुपयोगी भवति।
प्रश्नाः– (क) अस्य गद्यांशस्य समुचितं शीर्षक लिखतु।

(ख) यथा निर्देशं प्रश्नान् उतरतु–

1. ब्राहम्णभागः कस्य बोधकः अस्ति?
2. मन्त्रसमुदायस्य अपरं नाम किम् अस्ति?
3. यज्ञस्य आध्यात्मिंक रूप के विवेचयन्ति?
4. संन्यस्तातां कृते कः बहुपयोगी भवति?
5. ब्राहम्णग्रन्थाना कति भागः संन्ति?

(ग) यथानिर्देशं प्रश्नान् उत्तरतु–

1. 'ब्राहम्णभागः यागस्वरूपबोधकः अस्ति' अत्र कर्तृपदं लिखतु।
2. 'एषः विभक्तिः भवति' अत्र क्रियापदं लिखतु।
3. 'वैदिकसाहित्य प्रमुखतया द्विविघम्' अत्र विशेषणं विशेष्यपदं किम?

उत्तराणि–(क) वैदिक साहित्यम्

(ख) 1. यागस्वरूपबोधकः।
2. संहिता।
3. आरण्यकानिः।
4. उपनिषद्भागः।
5. त्रिधाः।

(ग) 1. ब्राहम्णभागः।
2. भवति।
3. 'वैदिकसाहित्यं' विशेष्यपदम्, द्विविधम् विशेषण,

**(2)**दैनन्दिनव्यवहारे यः सहायतां करोति सः बन्धुः भवति। यदि विश्वे सर्वत्र एताद्वशः भावः भवेत् तदा विश्वबन्धुत्व भवति। परन्तु अधुना संसारे कलहस्य अशान्तेः च वातावरणम् अस्ति। मानवाः परस्परं न विश्वसन्ति। ते परस्य कष्टं स्वकीयं कष्टं न गणयन्ति। अपि च समर्थाः देशाः असमर्थान् देशान् प्रति उपेक्षाभावं प्रदर्शयन्ति, तेषां उपरि स्वकीयं प्रभुत्वं स्थापयन्ति।संसारे सर्वत्र विद्वेषस्य शत्रुतायाः हिंसायाः च भावना दृश्यते, देशानां विकासः अपि अवरूद्धः भवति ।
इयं महती आवश्यकता वर्तते यत् एकः देशः अपरेण देशेन सह निर्मलेन हदयेन बन्धुतायाः व्यवहांर कुर्यात्। विश्वस्य जनेषु इयं भावना आवश्यकी। ततः विकसिताविकसितयोंः देशयोंः मध्ये स्वस्था स्पर्धा भविष्यति। सर्वे देशा ज्ञानविज्ञानयोंः क्षेत्रे मैत्री भावनया सहयोगेन च समृद्विं प्राप्तुं समर्था भविष्यन्ति। सूर्यचन्द्रयोः प्रकाशः सर्वत्र समानरूपेण प्रसरति। प्रकृतिः अपि सर्वेषु समत्वेन व्यवंहरति। तस्मात् अस्माभिः सर्वेः परस्परं वैर–भावम् अपहाय विश्वबन्धुत्वं स्थापनीयम्।
प्रश्ना–(क) अस्य गंद्याशस्य समुचिंत शीर्षकं लिखतु।
(ख) यथानिर्देशं प्रश्नान् उत्तरतु–
1. दैनन्दिन–व्यवहारे बन्धुः कः भवति?
2. समर्थाः देशाः कान् प्रति उपेक्षाभावं प्रदर्शनयन्ति?
3. अधुना संसारे कस्य वातावरणम् अस्ति?
4. सर्वेषु समत्वेन का व्यवहरति?
5. कयोः प्रकाशः सर्वत्र समानरूपेण प्रसरति?

(ग) यथा निर्देशं प्रश्नानाम् उत्तराणि लिखत–

CHEO BHINDER

1. ''मानवाः परस्परं न विश्वसन्ति'' अत्र कर्तपदं लिखत।
2. ''ते परस्य कष्टं ..................................न गणयन्तिं'' ते इति कर्तृपदस्य क्रिया पदं किम्?
3. '' इयं महति आवश्यकता कर्तते'' अत्र विशेषणपदं विशेष्यपदं लिखत।

उत्तराणि–

(क) विश्वबन्धुत्वम्।

(ख) 1. दैनन्दिनव्यवहारे यः सहायतां करोति सः बन्धुः भवति।
2. असमर्थान् देशान् प्रति।
3. कलहस्य अशान्तेः च वातावरणम्
4. प्रकृतिः
5. सूर्यचन्द्रयोः

(ग) 1. कर्तृपदम्–मानवाः
2. क्रियापदम्–गणयन्ति।
3. विशेषणपदम्–महति, विशेष्यपदम्–आवश्यकता।

**(3)**परेषाण् उपकारः परोपकारः उच्यते। सर्वः स्वार्थं समीहते'' इत्यपि कस्यचित् कवेः उक्तिः अस्ति। स्वार्थाय सर्वेऽपि प्राणिनः जीवन्ति। किन्तु यस्य जीवनम् अन्येभ्यः अस्ति, अपरेषां प्राणिनां सुखाय यः प्रयतते, कष्टं सहते च वस्तुतः तस्यैव जीवनं सार्थकम् अस्ति। पश्य, गावः अन्येभ्यः दुग्धं प्रयच्छन्ति, अतः जनाः ''मातर'' इति वदन्ति। नदी अपि स्वजलं स्वयं न पिबति,अन्येषां प्रणिनां कुते ददाति।मेघान् पश्यत स्वजलं सर्वेभ्यः वितरन्ति। पुष्पाणि सर्वेभ्यः सुगन्धं वितरन्ति। वृक्षाः फलानि प्रयच्छन्ति। मातृसमा उपकारिणी का विद्यते जगते? अतः स्वार्थं विहाय अन्येभ्यः जीवनमेव वरम्।

प्रश्ना– (क)अस्य गद्यांशस्य समुचितं शीर्षक लिखत।

(ब) यथा निर्देशं प्रश्नानाम् उत्तराणि लिखत–
1. सर्वे किं समीहन्ते?
2. काः अन्येभ्यः दुग्धं प्रयच्छन्ति?
3. नदी किं न पिबति?
4. किं वरं विद्यते?
5. किं नाम परोपकारः?

(ग) यथा निद्रेशं प्रश्नानाम् उत्तराणि लिखत–
1. '' अतः जनाः ''मातर'' इति वदन्ति। अत्र कर्तृपदं लिखत।
2. ''वृक्षाः फलानि प्रयच्छन्ति'' अत्र क्रियापदं लिखत।
3. ''मातृसमा उपकारिणी का विद्यते?'' अत्र विशेषणपदं लिखत।
4. ''अतः स्वार्थ विहाय अन्येभ्यः जीवनमेव वरम्'' अत्र विशेष्यपदं लिखत।

उत्तराणि–

(क) परोपकारः

(ख) 1. सर्वे स्वार्थ समीहन्ते।
2. गावः अन्येभ्यः दुग्धं प्रयच्छन्ति।
3. नदी स्वजलं स्वयं न पिबति।
4. स्वार्थं विहाय अन्येभ्यः जीवनमेव वरम्।
5. परेषाम् उपकारः नाम परोपकारः।

(ग) 1.जनाः।
2. प्रयच्छन्ति।
3. उपकारिणी ।
4. जीवनम्।

CBEO BHINDER

**(4)**सताम् आचारः सदाचारः इति कथ्यते। सज्जनाः यथा आचरन्ति तथैव आचरणो सदाचारो भवति। ते सर्वैः सह शिष्टतापूर्वकं व्यवहारं कुर्वन्ति। सदाचारस्य संतत्यैव संसारे जनः उन्नतिं करोति। देशस्य राष्ट्रस्य, समाजस्य, जनस्य च उन्नत्यै सदाचारस्य महती आवश्यकता वर्तते। सदाचारेणैव जनाः ब्रह्मचारिणो भवति। सदाचारेणैव शरीरं परिपुष्टं भवति। सदाचारेण बुद्धिः वर्धते। सदाचारेणैव मनुष्यः सत्यभाषणम् अन्यच्च सत्कर्म कर्तुं प्रवृत्तों भवति। अतएवं पूर्वैः महर्षिभिः 'आचारः परमोधर्मः'' इत्युक्तम्।

संसारे सर्वत्र सदाचारस्यैव महत्वं दृश्यते। ये सदाचारिणो भवन्ति, ते एवं सर्वत्र आदंर लभन्ते। वेदरामायणमहाभारतेष्वपि सदाचारस्य महिमा वर्णिता वर्तते। सदाचाराभावेवैन चतुवैदविदपि रावणो राक्षसः इति कथ्यते। अतः सर्वैः जनैः स्वोन्नत्यै सदाचारः पालनीयः।

प्रश्नाः–(क) अस्य गद्यांशस्य समुचितं शीर्षकं लिखत।

(ख) यथानिर्देशं प्रश्नान् उत्तरतु–

1. केषांम् आचारः सदाचारः इति कथ्यते?
2. केन बुद्धिः वर्धते?
3. कया संसारे जनः उन्नति करोति?
4. महर्षिभिः आचारः कीद्वशो धर्मः करोमिः?
5. सर्वैः जनैः स्वोन्नत्यै सदा कः पालनीयः?

(ग) यथानिर्देशं प्रश्नान् उत्तरतु–

1. '' सदाचारेणव शरीरं परिपुष्टं भवति'' इत्युस्मिन् वाक्ये कर्तृपदं किम् अस्मि?
2. '' तेएव सर्वत्र आदर.................................'' अत्र पूरणीयं समुचितं क्रियापदं किम्?
3. ''सर्वे' जनाः '' इत्यनयोंः पदयो': विशेषणपदं विशेष्यपदं च लिखत।

उत्तराणि–

(क) सदाचारस्य महत्वम्।

(ख) 1. सताम्
2. सदाचारेण।
3. सदाचारस्य सत्तयैव संसारे जनः उन्नतिं करोति।
4. महार्षिभिः आचारः परमोधर्मः कथितः।
5. सर्वे' जनैः सवोन्नत्यै सदा सदाचारः पालनीयः।

(ग) 1. शरीरम्।
2. लभन्ते।
3. विशेषणपदं–सर्वैः, विशेष्यपदं–जनैः

**(5)**अस्मिन् संसारे असंख्याः भाषाः सन्ति। तासु भाषासु संस्कृत भाषा सर्वोत्तमा विद्यते। संस्कृता परिकृता परिष्कृता दोषरहिता भाषा एवं संस्कृत भाषा कथ्यते। इयमेव भाषा देवभाषा, गीर्वाणगी, सुरवाणी इत्यादिभिः शब्दैः संबोध्यते। एतानि नामानि एव अस्या महत्वं सूचयन्ति।

संस्कृतभाषा जगतः सर्वासां भाषाणां जननी अस्ति। सर्वभाषाणां मूलरूप ज्ञानाय एतस्या आवश्यकता भवति। याद्वश महत् साहित्यं संस्कृत भाषायाः अस्ति ताद्वशं अन्यासां भाषाणां नास्ति। अस्यामेव भाषायां ब्राहम्ण–ग्रन्थाः आरण्यकाः अध्यात्मविषयप्रतिपादिका उपनिषदः वेदादयश्च सन्ति। आदिकाव्यं रामायणं वीरकांव्यं महाभारतमपि संस्कृतस्य गौरव वर्धयतः। अनयोंः ग्रन्थयोः विषयं गृहीत्वा एवं विशालस्य (संस्कृत) साहित्यस्य रचना संजाता।

प्रश्नाः–(क) अस्य गद्यांशस्य समुचिंत शीर्षकं लिखत।

(ख) यथा निर्देशं प्रश्नान् उत्तरतु–

1. सर्वोत्तमा भाषा का विद्यते?
2. सर्वभाषाणां मूलरूपं ज्ञानाय कंस्याः आवश्यकता भवति?

3. कीदृशी भाषा संस्कृतभाषा कथ्यते?
4. संस्कृतभाषा कैः शब्दैः संबोध्यते?
5. वीरकाव्यं किम् कथ्यते?

(ग) यथानिर्देशं प्रश्नान् उत्तरतु–

1. '' अस्मिन् संसारे असंख्याः भाषाः सन्ति।'' इत्यत्र सन्ति इति कियापदस्य कृते कर्तपदं किम?
2. ''संस्कृतभाषा सर्वोतमा विद्यते''–इत्यत्र कियापदम् किम्?
3. अस्मिन् गद्यांशे 'असंख्याः' इति विशेषणपदस्य विशेष्यं किम्?
4. 'सर्वासां भाषाणाम्'' इत्यत्र विशेषणपदं किम्?

उत्तराणि–

(क) संस्कृतभाषाया महत्वं।

(ख) 1. संस्क्तभाषायाः।
2. संस्कृतभाषायाः।
3. संस्कृता परिष्कृता दोषरहिता भाषा संस्कृतभाषा कथ्यते।
4. संस्कृतभाषा देवभाषा, गीर्वाणगीः, सुरवाणी इत्यादिभिः शब्दैः संबोध्यते।
5. वीरकाव्य महाभारतं कथ्यते।

(ग) 1. असंख्याः भाषाः।
2. विद्यते।
3. भाषाः।
4. सर्वासाम्।

**प्रश्न–(16)–(पत्र/प्रार्थनापत्र)**

**प्रश्न–(1)**भवान् दशम्यां कक्षायाः छात्रः सुरेश अस्ति।स्व विद्यालयस्य प्रधानाचार्याय दिन त्रयस्य रूग्णतावकाशार्थं प्रार्थना पत्रं लिखतु। अथवा

कुटुम्बस्य कुशलं जानीतुं अनुजं प्रति पत्रं अधोलिखित पत्र मंजुषा सहायतया रिक्त स्थानानि पूरयित्वा लिखत। (शीघ्रमेव, पूर्णतः, सकुशलं, कुटुम्बस्य, स्वास्थ्य, नूतनम्)

उदयपुरतःप्रिय चारूदत्तः

दिनांक–04–01–2021शुभाशिषः।अद्यः प्रातः अहं गृहं(1).......................समागतः। अत्र नास्ति किमपि(2)...................मम प्रस्थानकाले पितामही(3)............................स्वस्था नासीत। तस्या(4)........................विषये चिन्तितोऽस्मि। तस्या(5).........................कुशलवार्ता(6)..................प्रेषणीया।

शुभेच्छु

सुदेशः

(उत्तर–(1)सकुशलं (2)नूतनम् (3)पूर्णतः (4)स्वास्थ्य (5)कुटुम्बस्य (6)शीघ्रमेव )

**प्रश्न–(2)**भवान् दशम्याः कक्षायाः छात्रः महेशः अस्ति। स्व विद्यालयस्य प्रधानाध्यापकाय भ्रातुः विवाहे उपस्थातुं दिन द्वयस्य अवकाशार्थं प्रर्थनापत्रं लिखतु।

अथवा

भवान् भरतः। भवता विद्यालये सर्वश्रेष्ठ कीडकस्य पुरूस्कारः प्राप्तः स्व मातरं सूचयितुं मंजूषापद सहायतया रिक्त स्थानानि पूरयतु।

(पाठयामि, भवत्या, निवेदयतु, पुरूस्कारं, छात्रावासे, ज्ञानम्)

अजमेर नगरम्

दिनांक–04–01–2021

परमपूज्यमातुः चरणयोः प्रणामांजलिः।

अत्र सर्वं कुशलं अस्ति।(1)....................आशीर्वादने अहं विद्यालये सर्वश्रेष्ठ कीडकस्य (2)........................प्राप्तवान्। अहं सायं(3).............................अष्टमकक्षायाः छात्रान्

संस्कृतं(4)........................ । अनेन मम अपि(5)..................वर्धते। प्रधानाचार्यः अपि एतद् ज्ञात्वा प्रसन्नः अभवत्। पितृ चरणयोः मम प्रणामान्(6)........................ ।

भवत्याः पिय पुत्रः

भरतः

(उत्तर–(1)भवत्या (2)पुरस्कारं (3)छात्रावासे (4)पाठयामि (5)ज्ञानम् (6) निवेदयतु )

**प्रश्न–(3)**भवान् राजकीय उच्च माध्यमिक विद्यालय कंचनपुरस्य दशम्याः कक्षायाः छात्रः सोमनाथः अस्ति। स्व विद्यालयस्य प्रधानाचार्याय आवश्यक कार्यवशात् दिन द्वयस्य अवकाशार्थ प्राथ्रनापत्रं लिखत–

अथवा

भवान् सुरेशः मातरं प्रति पत्र मंजूषा पदं सहायतया लिखत–

( सम्यक्, मुख्यातिथिः, वार्षिकोत्सवः, उदयपुरतः, पितरम्, अभिनयम्)

(1)................................

दिनांक–05.01.2021

पूजनायाः मातृचरणाः।

नमोनमः।अत्र कुशलं तत्रास्तु। मम विद्यालये(2).......................आसीत। तत्र अहम् एकम् (3).......................कृतवान्। मन्त्रिमहोदयः(4)........................रूपेण आगतवान्। मम अध्ययनम् (5)......................चलति। गृहे सर्वेभ्यः नमोनमः अहम्(6)..........................प्रणमामि।

भवदीयः

सुरेशः

(उत्तर–(1)उदयपुरतः (2)वार्षिकोत्सव (3)अभिनयम् (4)मुख्यातिथिः (5)सम्यक् (6) पितरम् )

**प्रश्न–(4)**भवान् दशम्याः कक्षायाः महेन्द्रः अस्ति। स्थानान्तरण प्रमाण पत्रं प्राप्तुं स्व प्रधानाचार्याय प्रार्थना पत्रं लिखत।

अथवा

भवती संयोगिता। स्वकीया सखीं मंजुं प्रति स्वदिनचर्यायाः विषये पत्रं लिखत। मंजूषा सहायतया पूरयतः।

(ज्ञातुम्, संध्यादिकं, दिनचर्या, विद्यालयं, उत्तिष्ठामि,तत्रास्तु)

भरतपुरतः

दिनांक–06.01.2021

पिय सखी मंजो!

अत्र कुशलं (1)...................... । आशासे भवती अपि कुशलिनी। भवती मम दिनचर्या(2)............................इच्छसि। अतः पत्रं लिखामि। अहम् पंच वादने (3)...................... । ततः स्नानं पश्चात् व्यायामं करामि। सप्तवादनतः अध्ययनं प्रचलति। दशवादने भेजनं कृत्वा(4).....................गच्छामि। सायं पंच वादने क्रीडामि। सायं सप्तवादने(5)...................... कृत्वा भेजनं करामि। रात्रौ दशवादनपर्यन्तं पठामि। इत्यमेव मम(6)..................... ।

शेष कुशलम्।

भवत्याः सखी

संयोगिता

(उत्तर–(1)तत्रास्तु (2)ज्ञातुम् (3)उत्तिष्ठामि (4)विद्यालयं (5)संध्यादिकं (6) दिनचर्या )

**प्रश्न–(5)**भवान् गोपालः विद्यालयस्य शुल्कमुक्त्यर्थं स्वस्य प्रधानाचार्याय प्रार्थनापत्रं लिखत।

अथवा

CBEO BHINDER

भवान् राकेशः भवतः विद्यालयस्य छात्रान् शिक्षा यात्रायै जोधपुरम् नेष्यति। पितः आज्ञाप्राप्त्यर्थम् पत्र मंजूषा पद सहायतया पूरयित्वा लिखत।

(कुशलता, ऐतिहासिकं, अम्बायैः, भवन्तः, शिक्षायात्रायै, पितृमहोदयाः)

छात्रावासतः

दिनांक—05.01.2021

आदरणीयाः(1)..................................

सादरं नमोनमः।

भवताम् पत्रम् प्राप्तम्(2)............................च ज्ञाता। मम विद्यालयः शरदावकाशे छात्रान्(3).........................जोधपुरम् नेष्यति। अहम् अपि एतद्(4).......................नगरं द्रष्टुम् इच्छामि। महयम् यात्राव्ययार्थम् पंचशतकम् रूप्यकानि प्रेषयन्तु भवताम्। शेष कशलम्।(5).... ........................मम प्रणमाः अनुजाय च स्नेहः।

(6)............................

राकेशः

(उत्तर—(1)पितृमहोदयाः (2)कुशलता (3)शिक्षायात्रायैः (4)ऐतिहासिकम् (5)अम्बायैः (6) भवन्तः )

प्रष्न—(1)प्रार्थना पत्राणि—

सेवायाम्,

श्रीमन्तः प्रधानाचार्यमहोदयः

राजकीय उच्चमाध्यमिक विद्यालयः

जयपुरम् (राज.)

विषयः—दिन द्वयस्य रूग्णतावकाशाथ प्रार्थनापत्रम्।

महोदयः,

उपर्युक्तविषयान्तर्गतेनिवेदनम् अस्ति यत् अहं गतदिवसात् अतीव रूग्णोऽस्मि। अतः अहं विद्यालयम् आगन्त ुसमर्थः नास्मि। प्रार्थना अस्ति यत ्दिनांक13.03.2020 तः 01.5.03. 2020 दिनांक पर्यन्तं दिनत्रयस्य अवकाशं स्वीकृत्य माम् अनंगृहिष्यन्ति।

दिनांक

13.03.2020

भवताम् आज्ञाकारी शिष्यः

सुरेशः

कक्षा—दशमी

प्रष्न—(2) सेवायाम्,

श्रीमन्तः प्रधानाचार्यः महोदयः

राजकीय उच्च माध्यमिक विद्यालयः

उदयपुरम्

विषयः—दिन द्वयस्य अवकाशार्थम् प्रार्थनापत्रम्।

महोदयः,

उपर्युक्तविषयान्तर्गतनिवेदनम् असित यत् मम ज्येष्ठ भ्रातुः विवाह 01.01. 2021 दिनांके निश्चितः। वरयात्रा जयपुरं गमिष्यति। अतः दिन द्वयस्य अहं विद्यालयम् आगन्तुं असमर्थः अस्मि।

CBEO BHINDER

माम दिनांक 01.01.2021 तः 03.01.2021 पर्यन्तं दिन त्रयस्य अवकाशं स्वीकृत्य माम् अनुग्रहिष्यन्ति।।
दिनांकः–12.09.2020

भवताम् आज्ञाकारीषिष्यः
योगेशः
कक्षा–दशमी

प्रष्न–(3) सेवायाम्,
श्रीमन्तः प्रधानाचार्यमहोदयः
राजकीय उच्चमाध्यमिक विद्यालयः
कंचनपुरम्
विषयः–दिन द्वयस्य अवकाशार्थं प्रार्थनापत्रम्।
महोदयः,
उपर्युक्तविषयान्र्तगतेनिवेदनम् अस्ति यत् मम गृह`अत्यावश्यकम् कार्यं वर्तते। अतः अहं विद्यालयम् आगन्तुं समर्थः नास्मि। प्रार्थना अस्ति यत् दिनांक 11.03.2020 तः 12.03.2020 दिनांक पर्यन्तं दिन द्वयस्य अवकाशं स्वीकृत्य माम् अनुगृहिष्यन्ति।
दिनांक
13.03.2020

भवताम् आज्ञाकारी शिाष्यः
सोमनाथः
कक्षा–दशमी

प्रष्न–(4) सेवायाम्,
श्रीमन्तः प्रधानाचार्यमहोदयः
राजकीय उच्चमाध्यमिक विद्यालयः
भरतपुरम् (राज.)
विषयः–स्थानान्तरण–प्रमाण पत्र प्राप्त्यर्थम्।
महोदयः,
उपर्युक्त विषयान्र्तगत निवेदनम् अस्ति यत् मम पितुः स्थानान्तरण ंबीकानेरनगरे संजातम्। वयम् सर्वेऽपि परिवारिक जनाः तत्रैव गमिष्यामः। ममापितैः सह तत्र गमनं निष्चितमेव। अहं अत्र पठितुं असमर्थोऽस्मि। अतः प्रार्थना अस्ति यत् मह्यं स्थानान्तरणंप्रमाण पत्रं प्रदाय अनुग्रहिष्यन्ति श्रीमन्तः।
दिनांक
13.03.2020

भवताम् आज्ञाकारी शिष्यः
महेन्द्रः

कक्षा–दशमी

CBEO BHINDER

प्रष्न–(5) सेवायाम्,

श्रीमन्तः प्रधानाचार्यमहोदयः
राजकीय उच्चमाध्यमिक विद्यालयः
भीण्डर (राज.)

विषयः–शुल्कमुक्त्यर्थम् प्रार्थना पत्रम्।

महोदयः,

उपर्युक्त विषयान्तर्गत निवेदनम् अस्ति यत् अहं भवतां विद्यालये दशम्यां कक्षायां पठामि। मम पिता अतीव निर्धनः कृषकः अस्ति। अतः मम परिवारस्य आर्थिकदशा समीचीना नास्ति। मम पिता मदीयं विद्यालय शुल्क प्रदातुं असमर्थः अस्ति। अतः प्रार्थना अस्ति यत् मह्यं शुल्कमुक्तिं प्रदाय अनुग्रहिष्यन्ति श्रीमन्तः।

दिनांक
13.03.2020

भवताम् आज्ञाकारी शिष्यः
गोपालः
कक्षा–दशमी

**प्रश्न–(17)–संवाद लेखनम्–**

**प्रश्न–(1)**मंजूषायाः उचितपदैः**"शिक्षक–छात्र"** इति विषये संवादं पूरयतु।

(वयम्, वाद्ययंत्राणि, शोभनम्, परन्तु, गातुम्, महोदये, इच्छन्ति, गायामः)

शिक्षकः–छात्राः! किं भवन्तः किंचित् द्रष्टुम् (1)..................................?
छात्राः–महोदये! (2)........................तु गातुम् इच्छामः।
शिक्षकः–गातुम् इच्छन्ति (3)...........................अहं तु (4)..................न समर्थाः।
छात्राः–(5)......................वयं गास्यामः।
शिक्षकः–(6)..................अहम् अपि गास्यामि।
छात्राः– (7)........................यदि सन्ति शोभनम्।
शिक्षकः–एवं तदा(8).......................वयं।

(उत्तर–(1)इच्छन्ति (2)वयम्(3)परन्तु (4)गातुम्(5)महोदये (6) शोभनम् (7)वाद्ययंत्राणि (8)गायामः )

**प्रश्न–(2)**मंजूषायाः उचितपदैः**"पिता–पुत्रयोः"** इति विषये संवादं पूरयतु।

(आपणं, शीघ्रम्, पुस्तकम्, फलानि, करोषि, शतम्, स्यूतम्, आगच्छामि)

पिता–पुत्र!किं(1) ............................त्वम्?
पुत्रः–(2).....................पठामि पितः।
पिता–पुत्र! (3)......................गत्वा आगच्छसि किम्?
पुत्रः–पितः!(4)..........................लिखित्वा गच्छामि।
पिता–आपणतः(5)...........................आनय।
पुत्रः–(6)......................रूप्यकानि यच्छतु।
पिता–(7)..........................नीत्वा आपणं गच्छ।
पुत्रः–अहम् गत्वा शीघ्रम्(8).......................... ।

(उत्तर–(1)करोषि (2)पुस्तकम्(3)आपणम् (4)शीघ्रम्(5)फलानि (6) शतम् (7)स्यूतम् (8)आगच्छामि )

CBEO BHINDER

**प्रश्न–(3)**मंजूषायाः उचितपदैः**"धूम्रपान निवारणायः"** इति विषये संवादं पूरयतु।

(गन्तुम्, अस्य, तुभ्यं, धूम्रपानं, स्वास्थ्य, प्रेरणीयाः, मया, दुर्व्यसनस्य)

सोहन–गुरूवर!अहं पश्यामि विद्यालये केचन छात्राः(1)............................कुर्वन्ति।

गुरूः–वत्स!धूम्रपानं(2)..................विनाशकं अस्ति।

सोहन–गुरूवर!कोऽस्य(3).....................निवारणोपायः।

गुरूः–पुत्र!जनजागर्तिरेव(4)....................दुर्व्यसनस्य निवारणोपायः।

सोहन–गुरूवर!(5)............................किं करणीयम्?

गुरूः–त्वया छात्राः(6)..............यत् अस्माभिः धूम्रपानं न करणीयम्।

सोहन–गुरूवर!एवमेव करोमि। अधुना अहं(7)..........................इच्छामि।

गुरूः–वत्स!महत्वपूर्ण विषयोपरि पार्ता कर्तुं(8)........................धन्यवादं ददामि।

(उत्तर–(1)धूम्रपानं (2)स्वास्थ्य(3)दुर्व्यसनस्य (4)अस्य(5)मया (6)प्रेरणीयाः (7)गन्तुम् (8)तुभ्यं )

**प्रश्न–(4)**मंजूषायाः उचितपदैः**"वार्षिकोत्सवः"** इति विषये संवादं पूरयतु।

(भवेत्, सज्जीकरणं, उक्तवान्, सभामण्डपस्य, माल्यार्पणम्, आनेष्यति, स्वयमेव, कः)

शिक्षकः–श्वः वार्षिकोत्सवः भविष्यति तस्य कृते(1).......................अभवत् किं?

महेशः–कल्पना,रेखा,रमा च(2).......................अलंकारः करिष्यन्ति।

शिक्षकः–पूजासामग्रेः व्यवस्था(3) ..............करिष्यति?

कल्पना–महेशः करिष्यति।

शिक्षकः–मुख्यातिथि कः(4)....................?

रेखा–तस्य कृते मनोजः नियुक्तः अस्ति।

शिक्षकः–अध्यक्षमहोदय(5)................आगमिष्यति अथवा कस्यापि दायित्वं निश्चितम्?

मनोज–अध्यक्षमहोदय(6)....................स्वयमेव आगमिष्यामि।

शिक्षक–माल्यार्पणम् कः करिष्यति?

मनोज(7)..........................भवान् एव करिष्यति।

शिक्षक–श्वः कार्यक्रमः व्वस्थितः(8)................................तथा कुर्वन्तु।

(उत्तर–(1)सज्जीकरणम् (2)सभामण्डपस्य(3)कः (4)आनेष्यति(5)स्वयमेव (6)उक्तवान् (7)माल्यार्पणम् (8)भवेत् )

**प्रश्न–(5)**मंजूषायाः उचितपदैः**सख्योः संवादं** पूरयतु।

(तव, पाठशालायाम्, गच्छासि, स्नेहशील, पंचदश, एका, पाठशाला, आचारः)

रामः–त्वम् कुत्र(1)..........................?

सीता–अहम्(2).......................गच्छामि।

रामः–(3)....................पाठशालायाम् कति शिक्षकाः?

सीता–मम पाठशालायाम्(4)........................शिक्षकाः।

रामः–तव(5)...........................शिक्षिका न अस्ति?

सीता–(6)..........................शिक्षिका अस्ति।

रामः–शिक्षिकाणां(7)........................कीदृशः अस्ति?

सीता–(8)..............................अस्ति।

(उत्तर–(1)गच्छसि (2)पाठशालां(3)तव (4)पंचदश(5)पाठशालायाम् (6)एका (7)आचारः (8)स्नेहशीलः)

CBSEOBHINDER

**प्रश्न–(18) अधोलिखित वाक्यानां संस्कृतेन अनुवादं कुरूत–**

1.वे दोनों पत्र लिखति है। (तौ पत्रं लिखतः।)
2.ज्ञान के बिना सुख नहीं है। (ज्ञानं विना सुखं नास्ति।)
3.पेड से पत्ते गिरते है। (वृक्षात् पत्त्राणि पतन्ति।)
4.गाँव के बाहर मन्दिर है। (ग्रामात् बहिः मन्दिरः अस्ति।)
5.यह राम का घर है। (इदं रामस्य गृहं अस्ति।)
6.गंगा हिमालय से निकलती है। (गंगा हिमालयात् प्रभवति।)
7.मोहन गेंद से खेलता है। (मोहनः कन्दुकेन क्रन्दुकेन क्रीडति।)
8.सिंह वन में रहता है। ( सिंह वने निवसति।)
9.माता पुत्र पर स्नेह करती है। (माता पुत्रे स्निह्यति।)
10.वह राम के साथ बाजार जायेगा। (सः रामेण सह आपणं गमिष्यति।)
11.मोहन कलम से लिखता है। (मोहनः कलमेन लिखतिं)
12.तुम सब प्रातः दौडते हो। (यूयम् प्रातः धावथः।)
13.नगर के चारों ओर वृक्ष है। (नगरं परितः वृक्षाः सन्ति।)
14.मेरी कक्षा में तीस छात्र है। ( मम कक्षायां त्रिंशत् छात्राः सन्ति।)
15.गुरू शिष्य पर क्रोध करता है। (गुरूः शिष्याय क्रुध्यति।)
16.मैं कल दिल्ली जाउँगा। (अहं श्वः दिल्ली गमिष्यामि।)
17'वह चित्र देखती है। (सा चित्रं पश्यति।)
18.मोहन राम से सुन्दर है। (मोहनः रामात् सुन्दरतरः।)
19.वह पैर से लंगडा है। (सः पादेन खंजः अस्ति।)
20.दशरथ के चार पुत्र थे। (दशरथस्य चत्वारः पुत्राः आसन्।)
21 बालक को फल अच्छा लगता है। (बालकाय फलं रोचते।)
22 जननी जन्मभूमि स्वर्ग से महान् है। (जननी जन्मभूमिश्च स्वर्गादपि गरीयसी।)
23 मैं कल यहाँ आउँगा। (अहम् श्व अत्र आगमिष्यामि।)
24 हमें संस्कृत पढनी चाहिए। (वयम् संस्कृतम् पठेम।)
25 हम सब नाटक देखतें है। (वयम् नाटकं पश्यामः।)

–इति–

CBEO BHINDER

# माध्यमिक परीक्षा मॉडल प्रश्न–पत्र 2021
## आदर्श प्रश्न–पत्रम्
## संस्कृतम् (तृतीय भाषा)

समय : 3:15 घण्टे (सपाद होरात्रयम्) पूर्णांक : 80

परीक्षार्थिभ्यः सामान्य निर्देशाः

1 परीक्षार्थिभिः सर्वप्रथमं स्वप्रश्नपत्रोपरि नामांक अनिवार्यतः लेख्यः।

2 सर्वे प्रश्नाः अनिवार्याः।

3 प्रत्येकस्य प्रश्नस्योत्तरं उत्तरपुस्तिकायामेव देयम्।

4 प्रत्येकस्य प्रश्नभागस्य उत्तरं क्रमानुसारमेकत्रैव लेखितव्यम्

5 प्रश्नानां अंक भाराणि निम्नानुसाराणि सन्ति।

| खण्ड | | | |
|---|---|---|---|
| खण्ड–अ(A) | 1 ( i से x ) 2 से 11 =20 | 1 | 20 |
| खण्ड–ब(B) | 12 से 19 त्र 8 | 2 | 16 |
| खण्ड–स(C) | 20 से 23 त्र 4 | 4 | 16 |
| खण्ड–द(D) | 24 से 25 त्र 2 | 5 | 10 |
| खण्ड–य(E) | 26 से 28 त्र 3 | 6 | 18 |

CBEO BHINDER

## खण्ड–अ

प्रश्न 01 अद्योलिखित प्रश्नानां उचित क्रमाक्षरं स्व उत्तरपुस्तिकायां लिखतु – (10×1=10)
(क) भारतवर्षस्य उत्तरस्यां दिशि वर्तते –
(अ) हिमाद्रि :/हिमालय : (आ) विन्ध्याचल :
(इ) समुद्रः/इन्दुसरोवर : (ई) गंगासागर :

(ख) बालकस्य किं नाम आसीत् ? (जृम्भस्व सिंह! दन्तांस्ते गणयिष्ये आघृत्य।)
(अ) रिपुदम : (आ) दुष्टदमन :
(इ) अरिदमन : (ई) सर्वदमन :

(ग) मुगलै : सह प्रवृत्तै प्रतापस्य मुख्यं युद्धमासीत् –
(अ) चितौडयुद्धम् (आ) उदयपुरयुद्धम्
(इ) हल्दीघाटीयुद्धम् (ई) चावण्डयुद्धम्

(घ) बाल्यकाले स्वामी केशवानन्द : आसीत् –
(अ) पशुचारक : (आ) चायविक्रेता
(इ) राजसेवक : (ई) रजक : प्रक्षालक :

(ङ :) अंहिसा अस्ति –
(अ) परमोधर्म : (आ) परंतप :
(इ) परमंसत्यम् (ई) उपर्युक्तं सर्वमपि

(च) महाराणा प्रताप : कथं स्वदेशं रक्षितुम् इच्छति –
(अ) धनै : (आ) प्राणै :
(इ) विचारै : (ई) उद्घोषै :

(छ) मरूदेशे के प्रसन्ना : सन्ति –
(अ) गाव : (आ) मनुजा :
(इ) देवा : (ई) एते सर्वेऽपि

(ज) 'वंशभास्कर' इति ख्यातस्य ग्रन्थस्य रचनाकारोऽस्ति –
(अ) भास्कराचार्य : (आ) सूर्यमल्लमिश्रण :
(इ) मल्लिनाथ : (ई) महाराज : सूरजमल्ल :

(झ) पृथिव्यां त्रिषु रत्नेषु एतत् न गण्यते –
(अ) जलम् (आ) अन्नम्
(इ) धनम् (ई) सुभाषितम्

(ञ) ''अपि स्वर्णमयीलंका'' इत्यादौ कः कं प्रतिब्रूते –
(अ) लक्ष्मण : रामं प्रति (आ) राम : लक्ष्मणं प्रति
(इ) राम : हनुमन्तं प्रति (ई) रामलक्ष्मणौ सीतां प्रति

CBEO BHINDER

प्रश्न संख्या 2–3 पर्यन्तं अद्योलिखित सारण्याम् अंकानां स्थाने संस्कृतपदै : समयम् लिखतु –

प्रश्न –2 प्रातः (6.30) ................................................ वादने ईशवन्दना। 1
प्रश्न –3 सांय (7.15) ................................................ वादने प्रीतिभोजनम्। 1

प्रश्न संख्या 4–6 पर्यन्तं अद्योलिखित रेखांकित शब्दं पुनः शुद्धंकृत्वा स्व उत्तरपुस्तिकायां लिखतु –

(4) श्यामः नेत्रात् काणः अस्ति। 1
(5) मोहनः भिक्षुकं वस्त्रं ददति। 1
(6) हिमालयेन गंगा निर्गच्छति। 1

प्रश्न संख्या 7–8 पर्यन्तं अद्योलिखित वाक्यानां वाच्यपरिवर्तनं कुरूत –

(7) सीतया पुस्तकं पठ्यते। 1
(8) अहम् ग्रामं गच्छामि। 1

प्रश्न संख्या 9–11 पर्यन्तं मंजूषाया प्रदत्तैः अव्ययपदैः रिक्तस्थानानि पूरयित्वा लिखतु –

(9) गृहीत ................... केशेषु मृत्युना धर्ममाचरत्। (अपि, इव, तत्र) 1
(10) कथमहं ................... गच्छामि। (कुत्र, नूनम्, तत्र) 1
(11) जननी जन्मभूमिश्च स्वर्गाद् ................... गरीयसी। (यत् अपि, बहिः) 1

(खण्ड–ब)

प्रश्न 12 अद्योलिखित पदयोः सन्धिविच्छेदं कृत्वा सन्धेः नामापि लिखतु –
1 नमस्ते 1
2 कोऽपि 1

प्रश्न 13 अद्योलिखित पदयोः सन्धिं कृत्वा सन्धेः नामापि लिखतु –
1 हरिः + शेते 1
2 पुनः + अत्र 1

प्रश्न 14 अद्योलिखित पदेषु समस्तपदानां विग्रहम् कृत्वा समासस्य नामापि लिखतु –
1 प्रतिदिनम् 1
2 उपकृष्णम् 1

प्रश्न 15 अद्योलिखित विग्रहपदानां समासं कृत्वा समासस्य नामापि लिखतु –
1 जनानाम् अभावः 1
2 विधिम् अनतिक्रम्य 1

प्रश्न 16–17 पर्यन्तं अद्योलिखित रेखांकित पदेषु विभक्ति तत् कारणं च लिखतु –
(i) उदयपुरं परितः जलम् अस्ति। 1
(ii) छात्रः विद्यालयात् बहिः गच्छति। 1

CBEO BHINDER

(iii) दैत्येभ्यः हरिः अलम्। 1

(iv) रामः लक्ष्मणेन सह वनं गच्छति। 1

प्रश्न 18 कोष्ठके प्रदत्त प्रकृति प्रत्ययाभ्यां पदं निर्माय वाक्यं पूरयत

(i) गुरूं ................. शिष्यः सुखं लभते। (सेव्+शानच्) 1

(ii) ग्रामं ................. तृणं पश्यति। (गम्+शतृ) 1

प्रश्न 19 अद्योलिखित वाक्ययोः रेखांकित पदेषु प्रकृतिं प्रत्ययं च पृथककृत्वा लिखतु।

(i) मानवः सामाजिकः प्राणी अस्ति। 1

(ii) बालकोऽयं गुणवान् अस्ति। 1

(खण्ड–स)

प्रश्न संख्या 20 अद्योलिखितेषु अष्टसु प्रश्नेषु कतिपयानि चत्वारि प्रश्नानां उत्तराणि संस्कृत माध्यमेन लिखतु। (1×4=4)

(i) विद्यायाः प्रकारद्वयं किमस्ति ?

(ii) बालकः कस्य वंशस्य आसीत् ?

(iii) प्रतापस्य शासनकाले कः मुगलशासकः आसीत् ?

(iv) स्वामिनः केशवावन्दस्य संस्कृताध्ययनं कुत्र अभवत् ?

(v) मूढैः कुत्र रत्नसंज्ञा विधीयते ?

(vi) प्रतापः कस्य अभावे किमपि कर्तुम् असमर्थः ?

(vii) चरकाचार्येण मरूभूमेः का विशेषता प्रकटिता ?

(viii) 'जाट–प्लेटो' कः कथ्यते

प्रश्न संख्या 21 अद्योलिखित गद्यांशस्य सप्रसंग हिन्दी भाषयां अनुवादं करोतु – 4

सत्यंवद। धर्मचर। स्वाध्यायान्मा प्रमदः। सत्यान्न प्रमदितव्यम्। धर्मान्न प्रमदितव्यम्। कुशलान्न प्रमदितव्यम्। भूत्यै न प्रमदितव्यम्। स्वाध्याय–प्रवचनाभ्यां न प्रमदितव्यम्। देवपितृकार्याभ्यां न प्रमदितव्यम्। मातृदेवोभव। पितृदेवो भव। आचार्य देवोभव। अतिथि देवो भव। यानि अनवद्यानि कर्माणि तानि सेवितव्यानि नो इतराणि।

अथवा

प्रथमा – तथा (इति निष्क्रान्ता)
बालः – अनेनैव तावत् क्रीडयिष्यामि (इति तापसी विलोक्य हसति)
तापसी– भवतु, न मामयं गणयति (पार्श्वमवलोक्य)
कोऽत्र ऋषिकुमाराणाम् ? (राजानमवलोक्य)
भद्रमुख, एहि तावत्! मोचयानेन डिम्भलीलया
बाध्यमानं बाल मृगेन्द्रम्।
राजा– उपगम्य। (सस्मितम्) अयि भो महर्षिपुत्र।

CBSE BHINDER

प्रश्न संख्या 22 अद्योलिखित गद्यांशस्य सप्रसंग हिन्दी भाषयां अनुवादं करोतु – 4

तेन पुनः सैन्यशक्ति संग्रहकार्यम् आरब्धम्। महासैन्यं च रचयामास। तया सेनया च मुगलशासनं प्रति स्वातन्त्र्य युद्धं प्रारभत। स्वराज्यहस्तच्युतान् अनेकभागान् पुनः हस्तगतान् कृतवान्। तेषु मोही, गोगुन्दा, उदयपुरम् इत्यादयः मुख्याः आसन्। स्वराज्ये शान्तिं संस्थाप्य 'चावण्ड' नामकं स्थानं स्वराजधानीम् अकरोत्

अथवा

प्रथम भिल्ल : – हा भगवन्। अद्य कीदृशः समयः आगतः ?
प्रतापः अपि स्वदेशं परित्यज्य अन्यत्र प्रस्थितः अस्ति।
द्वितीय भिल्ल : – न जाने अस्य मेवाडदेशस्य भाग्ये किं लिखितम् अस्ति। हे दीनदयालो! परमेश्वर! त्वमपि अद्य इयान् निष्ठुरः कथं जातः!
तृतीय भिल्ल : – हा धिक्। वराकस्य समीपे न जीवन सामग्री न च युद्ध सामग्री एव विद्यते। मातृभूमेः दुर्दशां स्वचक्षुषा कथं द्रक्ष्याम : ? (रोदिति)

प्रश्न संख्या 23 अद्योलिखित पद्यांशस्य सप्रसंगं हिन्दी भाषायां अनुवादं करोतु – 4

गायन्ति देवाः किल गीतकानि
धन्यास्तु ते भारत भूमि भागे।
स्वर्गापवर्गास्पद मार्गभूते
भवन्ति भूयः पुरूषाः सुरत्वात्।।

अथवा

गावः प्रसन्नाः मनुजाः प्रसन्नाः
देवा प्रसन्नाः व्रतदानयज्ञैः।
किं नाम तद्यन्न मरौ समृद्धं।
विद्या–समृद्धो भवता विधेय :।।

(खण्ड–द)

प्रश्न 24 अद्योलिखितं गद्यांशं पठित्वा एतदाधारित प्रश्नानाम् उत्तराणि यथा निर्देशं लिखत – 5

मातृभूमिं प्रति प्रेम्णः, त्यागस्य, आत्मोत्सर्गस्य, सर्वस्वार्पणस्य च नैके समुज्ज्वलाः पृष्ठाः राजस्थानस्य इतिहासे मिलन्ति परन्तु 'रातीघाटी' नामकस्य युद्धस्य उल्लेख राजस्थानस्य इतिहासे लुप्त प्रायः वर्तते। बादशाह बाबर इत्यस्य पुत्रः (हुमायुँः इत्यस्य अनुजः) कामरान् बीकानेरस्य राजाराव जैतसी च–इत्यनयोः द्वयोःमध्यं बीकानेरे घटितं महत्त्युद्धं भारतीय शौर्यस्य गौरवशालिनी कथा अस्ति। अस्य युद्धस्य तिथि 26 ओक्टोबर 1534 ईस्वी इत्यस्ति। भारतं जेतुम् लाहोरात् आगतः कामरानः पलायितः। तस्य शिस्त्राणं (मुकुटम्) मध्ये मार्गं ''छोटड़िया'' ग्रामे पतितम्। अद्यापि तन्मुकुटम् तद्ग्रामे सुरक्षितम् अस्ति। अस्य ''रातिघाटी'' युद्धस्य किञ्चिद् विस्तृतं वर्णनं ''बीठसूजा'' इत्येनेन रचिते ''छन्द राव जैतसी रो'' इत्येस्मिन् ग्रन्थे वर्तते। अस्य च ग्रन्थस्य उद्धारं डॉ. एल.पी. टेस्सीटोरी अकरोत्।

प्रश्ना –1 अस्य अनुच्छेदस्य समीचीनं शीर्षक लिखतु। 1
2 रातीघाटी युद्धं कयोः द्वयोः मध्येऽभवत् ? 1
3 ''छन्दरावजैतसी रो'' इत्यस्य लेखकः कः ? 1
4 शिरस्त्राणं शब्दस्य किं अर्थम् ? 1
5 राती घाटी–युद्धं कुत्र कदा च घटितम् ? 1

GBEO BHINDER

अथवा

अस्माकं देशे षड् ऋतवः नवचेतना सञ्चरणाय समायान्ति। तत्रापि वर्षाकालं दृष्टवा सर्वे नन्दन्ति। अयं ग्रीष्मानन्तरं समायाति। वर्षाकाले आकाशे मेघाः आयान्ति। ते गर्जन्ति वर्षन्ति च। सौदामिन्यः स्फुरन्ति। सर्वत्र जलं भवति। वर्षाजलैः स्नाता वसुन्धरा मोदते। सर्वत्र हरीतिमा विभाति। वर्षाकाले मण्डूका रटन्ति। मयूराः नृत्यन्ति। वृक्षा पल्लविता भविन्त। निर्झराः मधुरं नदन्ति, नद्यः वेगेन वहन्ति। वर्षाकाले ग्रामे मार्गाः पंकमयाः भवन्ति। जलाशयाः कूपाः अपि पूर्णाः भवन्ति। कृषकाणां कृते वृष्टि एवं जीवनम् अस्ति।

1 अस्य गद्यांशस्य समुचित शीर्षकं लिखत। 1
2 कैः स्नाता वसुन्धरा भोदते। 1
3 केषां कृते वृष्टिः एव जीवनम् अस्ति ? 1
4 वर्षाकाले कुत्र मार्गाः पंकमयाः भवन्ति ? 1
5 अस्माकं दशे षड् ऋतवः किमर्थं समायान्ति ? 1

प्रश्न संख्या 25 वैदिक साहित्यं प्रमुखतया द्विविधम् अस्ति मन्त्ररूपः ब्राह्मण रूपश्च। मन्त्र समुदाय एव संहिता शब्देन व्यवह्यीयते। ब्राह्मण रूपः वेद भागः संहिता भागस्य व्याख्या रूपः विद्यते। ब्राह्मण भाग याग स्वरूप बोधकः अस्ति। एषः विभक्ति भवति– ब्राह्मणम्– आरण्यकम् उपनिषद् च यज्ञ स्वरूप प्रतिपादकः ब्राह्मणभागः। अरण्ये पठिताः यशस्य आध्यात्मिकरूपं विवेचयन्तः वेद भागः आरण्यकानि।

1 अस्य गद्यांशस्य समुचितं शीर्षकं लिखतु। 1
2 ब्राह्मणभागः कस्य बोधकः अस्ति ? 1
3 मन्त्र समुदायस्य अपरं नाम किम् अस्ति ? 1
4 यज्ञस्य आध्यात्मिकं रूपं के विवेचयन्ति ? 1
5 यज्ञः स्वरूप प्रतिपादकः के सन्ति ? 1

अथवा

परेषां प्राणिनामुकारः परोपकारोऽस्ति। परस्यहित सम्पादनं मनसा वाचा कर्मणा च अन्येषां हितानुष्ठानमेव परोपकारशब्देन गृह्यते। संसारे परोपकारः एवं सःगुणो विद्यते येन मनुष्येषु सुखस्य प्रतिष्ठा वर्तते। परोपकारेण हृदयं पवित्रं सरलं, सरसं, सदयं च भवति। सत्पुरूषा कदापि स्वार्थ पराः न भवन्ति। ते परेषां दुःखं स्वीयं दुःखंमत्वा तन्नाशाय यतन्ते। सज्जनाः परोपकारेण एवं प्रसन्नाः भवन्ति।

1 अस्य गद्यांशस्य समुचितं शीर्षकं लिखतु। 1
2 परोपकारः कः अस्ति ? 1
3 परोपकारेण हृदयं कीदृशं भवति ? 1
4 सज्जनाः केन प्रसन्नाः भवन्ति ? 1
5 सत्पुरूषाः कदापि किं न भवन्ति ? 1

(खण्ड–य)

प्रश्न संख्या 26 भवान् राजकीय–उच्च–माध्यमिक–विद्यालय–सोमपुरस्य दशमकक्षायाः विद्यार्थी सुरेशः। भवतः पिता अतीव निर्धनः अस्ति। स्वस्य प्रधानाचार्याय शुल्कमुक्त्यर्थम् एकं प्रार्थनापत्रं लिखतु। 6

अथवा

भवान् गोविन्दः। स्वकीयं मित्रं राजेन्द्रं प्रति स्वविद्यालयस्य वार्षिकोत्सवविषये अद्योलिखितपत्रं मंजूषापदसहायतया पूरयित्वा लिखतु।

CBEO BHINDER

(परिवारे, वार्षिकोत्सवस्य, पत्रोत्तरं, स्वकरकमलेन, कुशलताम्, विविधाः, स्वीकृतवान्, पुरस्कारम्)
शैलपुरतः
दिनांक :– 17.12.2020
प्रियमित्रं राजेन्द्र।
नमस्ते।
अत्र अहं कुशलं, भवतः ...................................... कामये। फरवरी मासे पच्चमे दिनांके मम विद्यालये . ..................................... आयोजनम् अभवत्। आस्मिन् दिवसे ............................ प्रतियोगिताः अभवन्। अहमपि धावनप्रतियोगितायां, वादविवादप्रतियोगितायां च भाग .............................। पुरस्कारवितरणसमारोहे अस्माकं क्षेत्रस्य विधायकमहोदयः .......................................... परुस्कारवितरणं कृतवान्। अहमपि .......................... प्राप्तवान्।
अस्तु ................................ सर्वेभ्यः यथायोग्यं नमस्काराः, ............................... शीघ्रमेव प्रेषणीयम्।

भवतः मित्रम्
गोविन्दः

प्रश्न 27 मंजूषायाः उपयुक्तपदानि गृहीत्वा पितापुत्रयोः मध्ये योगदिवसविषये संवादं पूरयतु। 6
(कुर्वन्ति, आगच्छ, जूनमासस्य, कार्यक्रमः, शक्नोमि, अस्माकम्, योगदिवसे, अन्तराष्ट्रियदिवसः)

पुत्र– भोः पितः। ............................ 29 दिनांके कः दिवसः भवति ?
पिता – अरे। तस्मिन् दिने तु .................... भवति।
पुत्रः– योगदिवसे के ..................... भवन्ति ?
पिता– ................................ विश्वेजनाः प्रणायामं व्यायामं च कुर्वन्ति।
पुत्र– योगेन ................................. स्वास्थ्यं सम्यक् भवति वा ?
पिता– आम्। ये योगं ................................. ते रूग्णाः न भवति।
पुत्र – तर्हि अहम् अपि योगं कर्तं ................ वा ?
पिता– किमर्थं न, ................................... आवां योगं करवाव।

अथवा

मंजुषायाः उपयुक्त पदानि गृहीत्वा अद्योलिखितं ''मातापुत्रयोः'' संवादे पूरयत !
(मंजूषा – नैव, दीपावली, स्वयमेव, स्वयसि, तिमिराच्छन्नं, सन्ध्यासमयः, तान्, अत्रानय, दीपिकाः, स्वस्ति।)
पुत्रः– मातः किं त्वमद्य पक्वान्नं मिष्ठान्नं च ................................................. ?
माता– पुत्र किं त्वं न जानासि यत् अद्य .................................... उत्सवः अस्ति ?
पुत्रः – .................................... तु। कथय, दीपमालिकायाः उत्सवः कीदृशः भवति ?
माता– अस्तु, त्वं .............................. ज्ञास्यसि। अधुना ............................ सञ्जातः नभः च ............... . अस्ति ?
पुत्रः – ततः किम् ?
माता– गृहे ........................ सन्ति। त्वं तान् ......................। अहं तान् प्रज्वालयामि
पुत्रः – यदाज्ञापयति माता।
माता – स्वस्ति अस्तु।

CBEO BHINDER

प्रश्न संख्या 28 अद्योलिखित वाक्येषु केषांचन षड़ वाक्यानां संस्कृतभाषया अनुवादं करोतु। 1+1+1+1+1+1 = 6

1 विद्या विनम्रता प्रदान करती है।
2 जननी और जन्मभूमि स्वर्ग से भी महान है।
3 विपत्ति के समय दोषारोपण करना ही कायरपुरूष का लक्षण है।
4 कृष्ण के चारों ओर बालक है।
5 हम सब नाटक देखते है।
6 राजेश महेश का मित्र है।
7 मोहन वाराणसी जाता है।
8 घोडा घास खाता है।
9 विद्यालय में अध्यापक है।
10 राधा भोजन पकाती है।
11 राम कक्षा में पढ़ता है।
12 हम दोनों कहाँ जाते है।

CBEO BHINDER